# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – २** | **प्रश्नपत्रम् – २** | **गुणाः – ५०** |
| **विषयः – वास्तुशास्त्रम्** | **सत्रम् – ४** | **समयः – १० तः १२** |
| **दिनाङ्कः – १४/०७/२०२१** | **सन्दर्भग्रन्थः – प्रासादमण्डनम्, बृहत्संहिता** | |

**सूचना - निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्यां कुरुत।**

१ चतुर्भागं समारभ्य यावत् सूर्योत्तरं शतम्।
भागसङ्ख्येति विख्यातां फालनात्कर्णबाह्यतः॥

२ मस्तके तस्य छाद्यस्य श्रृङ्गयुग्मं प्रदापयेत्।
सितश्रृङ्गस्तदा नाम ईश्वरस्य सदा प्रियः॥

३ कर्णे प्रतिरथे भद्रे द्वे द्वे श्रृङ्गे प्रकारयेत्।
रथोपरथे तिलकं प्रत्यङ्गञ्च रथोपरि

४ क्षेत्रऽष्टांशैर्विभक्ते तु कर्णो भागद्वयं भवेत्।
भद्रार्द्धं कर्णतुल्यञ्च भागेनैकेन निर्गमः॥

**प्रश्नः २** दैवज्ञस्य लक्षणं विवर्ण्यताम्।

**प्रश्नः ३** वैराज्यादिप्रासादवर्णनं क्रियताम्।

**प्रश्नः ४** मेरुप्रासादवर्णनं क्रियताम्।

**प्रश्नः ५** अष्टगूढमण्डपानां विचारः क्रियताम्।

**प्रश्नः ६ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या।**

१ बहुलेपो चाऽल्पलेपश्च समसन्धिः शिरोगुरुः।
सशल्यं पादहीनं तु तच्चा वास्तु विनश्यति॥

२ तद्रूपं तत्प्रमाणं स्यात्पूर्वसूत्रं न चालयेत्।
हीने तु जायते हानिरधिके तु धनक्षयः॥

३ पूर्वोत्तरदिशामूढं मूढं पश्चिम-दक्षिणे ।
तत्र मूढममूढं वा यत्र तीर्थं समाहितम् ॥

४ सिद्धायतनतीर्थेषु नदीनां सङ्गमेषु च ।
स्वयंभूबाललिङ्गेषु तत्र दोषो न विद्यते ॥

**प्रश्नः ७** दिङ्दोषपरिहारस्य वर्णनं क्रियताम् ।

**प्रश्नः ८** जीर्णोद्धारविधिः विलिख्यताम् ।

**प्रश्नः ९** वराहमिहिरमते प्रशस्तभूमिलक्षणं विलिख्यताम् ।

**प्रश्नः १०** वराहमिहिरमते शुभाशुभवृक्षाणां वर्णनं क्रियताम् ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ बृहत्संहिता ग्रन्थस्य रचनाकारः कः ?
२ नृपस्य प्रथमगृहप्रमाणं लिखत ।
३ पाकगृहस्य निर्माणं कस्मिन् कोणे शुभं भवति ?
४ देवगृहस्य निर्माणं कस्मिन् कोणे शुभं भवति ?
५ गृहस्य कस्मिन् भागे ब्रह्मस्थानस्य निर्माणं शुभं भवति ?
६ गृहे कस्यां दिशि अध्ययनकक्षस्य निर्माणं करणीयम् ?
७ गृहस्य कस्यां दिशि वटवृक्षः शुभो भवति ?
८ श्वेतवर्णा भूमिः कस्य वर्णस्य कृते शुभा भवति ?
९ कुशयुक्ता भूमिः कस्य वर्णस्य कृते शुभा भवति ?
१० शुभाशुभग्रहाणां नामानि लिखत ।
११ 'प्रासादमण्डनम्' ग्रन्थस्य रचनाकारः कः ?
१२ केषाञ्चित् पञ्चशुभवृक्षाणां नामानि लिखत ।
१३ ब्राह्मणस्य प्रथमगृहविस्तारप्रमाणं लिखत ।
१४ उदुम्बरवृक्षः गृहस्य कस्यां दिशि शुभो भवति ?
१५ एकस्यामङ्गुल्यां कति यवोदरात्मकमानं भवति ?

****